# Shri Bhairava Panjara Kavacham

# શ્રીભૈરવપઞ્જરકવચમ્

## Document Information

Text title : Bhairava Panjara Kavacham

File name : bhairavapanjarakavacham.itx

Category : shiva, kavacha, panjara

Location : doc_shiva

Transliterated by : Jagannadha Rao

Proofread by : Jagannadha Rao

Latest update : May 21, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

Shri Bhairava Panjara Kavacham

# શ્રીભૈરવપઞ્જરકવચમ્

પાર્વત્યુવાચ -
દેવ દેવ મહાદેવ સંસાર પ્રિયકારક ।
પઞ્જરં બટુકસ્યાસ્ય કથનીયં મમ પ્રભો ॥ ૧॥

શ્રીશિવ ઉવાચ -
પૂર્વમ્ ભસ્માસુરત્રાસાદ્ ભય વિહ્વલતાં સ્વયમ્ ।
પઠનાદેવ મે પ્રાણા રક્ષિતઃ પરમેશ્વરિ ॥ ૨॥

સર્વદુષ્ટવિનાશાય સર્વરોગનિવારણમ્ ।
દુઃખશાન્તિકરં દેવિ હ્યલ્પમૃત્યુભયાપહમ્ ॥ ૩॥

રાજ્ઞાં વશ્યકરં ચૈવ ત્રૈલોક્ય વિજયપ્રદમ્ ।
સર્વલોકેષુ પૂજ્યશ્ચ લક્ષ્મીસ્તસ્ય ગૃહે સ્થિરા ॥ ૪॥

અનુષ્ઠાનં કૃતં દેવિ પૂજનં ચ દિને દિને ।
વિના પઞ્જરપાઠેન તત્સર્વં નિષ્ફલં ભવેત્ ॥ ૬॥

અસ્ય શ્રીબટુકભૈરવપઞ્જરકવચમન્ત્રસ્ય કાલાગ્નિરુદ્રઃ ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । ૐ બટુકભૈરવો દેવતા ।
હ્રાં બીજં ૐ ભૈરવી વલ્લભા શક્તિઃ ।
ૐ દણ્ડપાણયે નમઃ કીલકમ્ ।
મમ સકલકામનાસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

ૐ હ્રાં પ્રાચ્યાં ડમરુહસ્તો રક્તવર્ણો મહાબલઃ ।
પ્રત્યક્ષમહમીશાન બટુકાય નમો નમઃ ॥

ૐ હ્રીં દણ્ડધારી દક્ષિણે ચ પશ્ચિમે ખડ્ગધારિણે ।
ૐ હ્રૂં ઘટાવાદી મૂતિરુત્તરસ્યાં દિશિસ્તથા ।
ૐ હ્રૈં અગ્નિરૂપો હ્યાગ્નેય્યાં નૈરૃત્યાં ચ દિગમ્બરઃ ।
ૐ હ્રૌં સર્વભૂતસ્થો વાયવ્યે ભૂતાનાં હિતકારકઃ ॥

ૐ હ્રશ્ચવાષ્ટસિદ્ધિશ્ચ ઈશાને સર્વસિદ્ધિકરઃ પરઃ ।
પ્રત્યક્ષમહમીશાન બટુકાય નમો નમઃ ॥

ૐ હ્રાં હ્રીં હ્રૂં હ્રૈં હ્રૌં હ્રઃ સ્વાહા ઊર્ધ્વં ખેચરિણં ન્યસેત્ ।
રુદ્રરૂપસ્તુ પાતાલે બટુકાય નમો નમઃ ॥

ૐ હ્રીં બટુકાય મૂર્ધ્નિ લલાટે ભીમરૂપિણમ્ ।
આપદુદ્ધરણં નેત્રે મુખે ચ બટુકં ન્યસેત્ ॥ ૧॥

કુરુ કુરુ સર્વસિદ્ધિર્દેહે ગેહે વ્યવસ્થિતઃ ।
બટુકાય હ્રીં સર્વદેહે વિશ્વસ્ય સર્વતો દિશિ ॥ ૨॥

આપદુદ્ધારકઃ પાતુ હ્યાપાદતલમસ્તકમ્ ।
હસક્ષમલવરયું પાતુ પૂર્વે દણ્ડહસ્તસ્તુ દક્ષિણે ॥ ૩॥

હસક્ષમલવરયું નૈરૃત્યે હસક્ષમલવરયું પશ્ચિમેઽવતુ ।
સર્વભૂતસ્થો વાયવ્યે હસક્ષમલવરયું ઘટાવાદિન ઉત્તરે ॥ ૪॥

હંસઃ સોહં તુ ઈશાને ચાષ્ટસિદ્ધિકરઃ પરઃ ।
શંક્ષેત્રપાલ ઊર્ધ્વે તુ પાતાલે શિવ સન્નિભઃ ॥ ૫॥

એવં દશદિશો રક્ષેદ્બટુકાય નમો નમઃ ।
ઇતિ તે કથિતં હ્રીં શ્રીં ક્લીં ઐં સદાઽવતુ ॥ ૬॥

ૐ ફ્રેં હું ફટ્ ચ સર્વત્ર ત્રૈલોક્યે વિજયી ભવેત્ ।
લક્ષ્મીં ઐં શ્રીં લં પૃથિવ્યાં ચ આકારો હં મમાવતુ ॥ ૭॥

સ્રૌં પ્રૌં જ્રૌં ઊઁ ઊં યં વાયવ્યાં રં રં રં તેજોરૂપિણમ્ ।
ૐ કં ખં ગં ઘં ઙં બટુકં ચં છં જં ઝં ઞં કપાલિનમ્ ॥ ૮॥

ટં ઠં ડં ઢ ણં ક્ષેત્રેશં તં થં દં ધં નં ઉમાપ્રિયમ્ ।
પં ફં બં ભં મં મમરક્ષ યં રં લં ભૈરવોત્તમમ્ ॥ ૯॥

વં શં ષં સં આદિનાથં લં ક્ષં વૈ ક્ષેત્રપાલકમ્ ।
(ફલશ્રુતિઃ)
એવં પઞ્જરમાખ્યાતં સર્વસિદ્ધિકરં ભવેત્ ॥ ૧૦॥

દુઃખદારિદ્ર્યશમનં રક્ષકઃ સર્વતો દિશઃ ।
આવશ્યં સર્વતો વક્ષ્યં સર્વબીજૈશ્ચ સમ્પુટમ્ ॥ ૧૧॥

સર્વરોગહરં દિવ્યં સર્વત્ર સુખમાપ્નુયાત્ ।

એવં રહસ્યમાખ્યાતં દેવાનામપિ દુર્લભમ્ ॥ ૧૨॥

વજ્રપઞ્જરનામેદં યે શ‍ૃણ્વન્તિ વરાનને ।
આયુરારોગ્યમૈશ્વર્યં કીર્તિલાભઃ સુખં જયઃ ॥ ૧૩॥

લક્ષ્મી મનોરમા બુદ્ધિસ્તેષાં ગેહે વ્યવસ્થિતા ।
સુશીલાય સુદાન્તાય ગુરુભક્તિપરાય ચ ॥ ૧૪॥

તસ્ય શીઘ્રં ચ દાતવ્યમન્યથા ન કદાચન ।
ગોપનીયં પ્રયત્નેન સર્વગોપ્યમયં ભવેત્ ॥ ૧૫॥

યસ્મૈ કસ્મૈ ન દાતવ્યં ન દાતવ્યં કદાચન ।
રાજ્યં દેયં શિરો દેયં ન દેયં ભૈરવાક્ષરમ્ ॥ ૧૬॥

એકકાલં દ્વિકાલં વા ત્રિકાલં પઠતે નરઃ ।
સર્વપાપવિનિર્મુક્તો શિવેન સહ મોદતે ॥ ૧૭॥

॥ ઇતિ શ્રીભૈરવપઞ્જરકવચં સમાપ્તમ્ ॥

Encoded and proofread by Jagannadha Rao

*Shri Bhairava Panjara Kavacham*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*